# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

**कक्षा** - आचार्य-२, सेमेस्टर-३ | **प्रश्नपत्रम्** - ५ | **गुणाः** - ७०

**विषयः** - पुराणेतिहासः | **कोड** - CE-5.3.3 | **समयः** - ११-०२

**दिनाङ्कः** - २९.११.२०१६ | **ग्रन्थः** - *देवीभागवते प्रथमद्वितीयस्कन्धौ।*
*स्कन्दपु. मा.सहितम्*

---

### प्रथमान्वितिः ( युनिट - १ )

**प्रश्नः १** **कस्याप्येकस्य श्लोकस्य ससन्दर्भं प्रसङ्गं संस्कृते विवेचनं कुरुत।** ०४

*(१)* *धन्योऽहमतिभाग्योऽहं पावितोऽहं महात्मभिः।*
*यत्पृष्टं सुमहत्पुण्यं पुराणं वेदविश्रुतम्॥*

*(२)* *सौम्यव्यासस्य भार्यायां कस्यां जातः सुतः शुकः।*
*कथं वा कीदृशो येन पठितेयं सुसंहिता॥*

**प्रश्नः २** **कस्याप्येकस्य सविस्तारेणोत्तरं लिखत।** १२

*१. भगवते व्यासस्य पुत्रमोहप्रसङ्गं विवेचयत।*
*२. देवीभागवतस्थान् गृहस्थाश्रमविचारान् विवेचयत।*

**प्रश्नः ३** **द्वयोः टिप्पणीं लिखत।** ०४

*(१) श्रीदेवीभागवतश्रवणविधिः।*
*(२) ग्रन्थसंख्याविषयकथनं च।*
*(३) देवीभागवतश्रवणात् सुद्युम्नः पुरुषः जातः।*
*(४) वसुदेवप्राप्तं श्रवणफलम्।*

### द्वितीयान्वितिः ( युनिट - २ )

**प्रश्नः ४** **कस्याप्येकस्य ससन्दर्भं सप्रसङ्गं संस्कृते विवेचनं कार्यम्।** ०४

*(१)* *कोऽसौ पुरुरवा राजा कोर्वशी देवकन्यका।*
*कथं कष्टं च संप्राप्तं तेन राज्ञा महात्मना॥*

*(२)* *सुद्युम्ने तु दिवं याते राज्यं चक्रे पुरुरवाः।*
*सुगुणश्च सुरूपश्च प्रजारञ्जन तत्परः॥*

**प्रश्नः ५** **कस्याप्येकस्य सविस्तारेणोत्तरं लिखत।** ०८

*१. ब्रह्मकृतां भगवत्याः स्तुतिं वर्णयत।*
*२. पुरुरवाजन्मकथां सविस्तारं लिखत।*

**प्रश्नः ६ अधो लिखितेषु त्रयाणामतिलघूत्तराणि लिखत । ०३**

*(१) मधुकैटभयोः नाशः कस्यां तिथौ जातः ?*

*(२) ब्रह्मा कां स्तौति ?*

*(३) शिवः व्यासाय किं वरं यच्छति ?*

*(४) बुधस्य पितुः नाम किम् ?*

## तृतीयान्वितिः ( युनिट - ३ )

**प्रश्नः ७ कस्याप्येकस्य ससन्दर्भप्रसङ्गं संस्कृते विवेचनं कार्यम् । ०४**

*(१) नाहं गृहं करिष्यामि दुःखदं सर्वदा पितः ।*
*वागुरासदृशं नित्यं बन्धनं सर्वदेहीनाम् ॥*

*(२) संदेहोऽयं महाराज वर्तते हृदये मम ।*
*मायामध्ये वर्तमानः स कथं निःस्पृहो भवेत् ॥*

**प्रश्नः ८ कस्याप्येकस्य सविस्तारेणोत्तरं लिखत । ०८**

*१. शुकस्य उत्पत्तिकथां सविस्तारं वर्णयत ।*

*२. ''जनकस्य शुकाय उपदेशः'' प्रसङ्गोऽयं वर्णयत ।*

**प्रश्नः ९ अधो लिखितेषु त्रयाणामतिलघूत्तराणि लिखत । ०३**

*(१) शुकस्य पितुः नाम किम् ?*

*(२) व्यासस्य मातुः नाम किम् ?*

*(३) राज्ञः शंतनोः उद्वाहः कया सह जातः ?*

*(४) व्यासस्य जन्म कुत्र जातम् ?*

## चतुर्थान्वितिः ( युनिट - ४ )

**प्रश्नः १० कस्याप्येकस्य ससन्दर्भप्रसङ्गं संस्कृते विवेचनं कार्यम् । ०४**

*(१) पञ्चानां द्रौपदीभार्या सामान्या सा पतिव्रता ।*
*पञ्च पुत्रान्तु तस्याः स्युर्भर्तृभ्योऽतीव सुन्दराः ॥*

*(२) तच्छ्रुत्वा वचनं तस्य व्यासः सत्यवतीसुतः ।*
*उवाच वचनं तत्र सभायां नृपतिं च तम् ॥*

**प्रश्नः ११ कस्यचिदेकस्य सविस्तारेणोत्तरं लिखत । १२**

*१. व्यासस्य जन्मकथां सविस्तारं प्रतिपादयत ।*

*२. सत्यवत्या सह शंतनोः उद्वाहकथां लिखत ।*

**प्रश्नः १२ द्वयोः टिप्पणीं लिखत । ०४**

*(१) तक्षककश्यपयोः संवादः ।*

*(२) जनमेजयस्य सर्पयज्ञः ।*

*(३) आस्तीकस्य उत्पत्तिः ।*

*(४) श्रीमद्भागवतमाहात्म्यम् ।*

=०=